कटो गतौ इत्यत्र इ ई इति प्रश्लेषात् लभ्यः सि०कौ०

**इक्** स्मरणेऽधिपूर्व्वक एव कित् कित्करणमधीगर्थेत्यादौ विशेषार्थम् अदादि०पर०सक०अनिट्। अध्येति अध्यैषीत् अध्यगात् इत्यन्ये इण इवास्य तिङि रूपं न भवति। अधीयन्। "सभीतयोराघवयोरधीयन्" भट्टिः। एतद्योगे कर्म्मणि संबन्धविवक्षायां षष्ठी। मातुरध्येति। प्रतिपदविहिततयाऽनया षष्ठ्या न समासः मातुरध्ययनम्। "कियत्स्विदिन्द्रो अध्येति कियन्मातुः कियत् पितुः" ऋ०४, १७,१२। "रामस्य दयमानोऽसावध्येति तव लक्ष्मणः" भट्टिः सम्बन्धाविवक्षायां तु द्वितीया। "अग्निं स्वर्ग्यमध्येषि मृत्यो!" कठो०। "अयमारुणिः संप्रतीममात्मानं वैश्वानरमध्येति" छा० उ०। "अधीहि भगवन्। ब्रह्मेति" छा०उ०। [ वंशाङ्कुरे

**इकट** पु० एति भूमिमुद्भिद्य गच्छति इ-कटच् वा गुणाभावः।

**इक्कट** पु० ईयते इ-क्विप् इत् लभ्यः कटो यस्मात् ५ ब०तस्य कः। कटसाधने तृणविशेषे त्रिका० इत्कट इति हारा०। तस्य सन्निकृष्टदेशादिः कुमुदा० चतुरर्थ्यां ठच्। इक्कटिक तत्सन्निकृष्टदेशादौ त्रि० स्त्रियां ङीष्। प्रेक्षा० चतुरर्थ्याम् इनि। तदर्थे स्त्रियां ङीप्।

**इक्कवाल** पु० "चेत् कण्टके (१ ४ ७ १०) पनफरे (२,५,८,११) तु ग्रहाः समस्ताः स्यादिक्कवाल इति राज्यसुखाप्तिहेतुः" नील० ता०उक्ते वर्षलग्नतः उक्तस्थानानामन्यतमस्थाने रव्यादिसमस्तग्रहाणां स्थितिहेतुके राजयोगभेदे।

**इक्षु** पु० इष्यतेऽसौ माधुर्य्यात् इष+क्सु। मधुररसयुते असिपत्रे स्वनामख्याते वृक्षे। तद्भेदगुणादिकमुक्तं भावप्र०। इक्षुर्दीर्घच्छदः प्रोक्तस्तथा भूमिरसोऽपि च। गुडमूलोऽसिपत्रश्च तथा मधुतृणः स्मृतः। इक्षवो रक्तपित्तघ्ना बल्या वृष्याः कफप्रदाः। स्वादुपाकरसाः स्निग्धा गुरवो मूत्रला हिमाः। अथेक्षुभेदाः "पौण्ड्रको भीरुकश्चापि वंशकः शतपोरकः। कान्तारस्तापसेक्षुश्च काण्डेक्षुः सूचिपत्रकः। नैपालो दीर्घपत्रश्च नीलपोरोऽथ कोशकृत्। इत्येता जातयस्तेषां कथयामि गुणानपि। तत्र पौण्ड्रकभीरुकयोर्गुणाः वातपित्तप्रशमनो मधुरो रसपाकयोः। सुशीतो वृंहणो बल्यः पौण्ड्रको भीरुकस्तथा अथ (कुशियारा) कोशकृतो गुणाः "कोशकारो गुरुः शीतो रक्तपित्तक्षयापहः। अथ (काजला) कान्तारेक्षुगुणाः कान्तारेक्षुर्गुरुर्वृष्यः श्लेष्मलो वृंहणः सरः। (बडौखा) वंशकगुणाः "दीर्घपोरः सुकठिनः सक्षारो वंशकः स्मृतः। शतपोरकगुणाः "शतपर्व्वा भवेत्किञ्चित्कोशकारगुणान्वितः। विशेषात्किञ्चिदुष्णश्च सक्षारः पवनापहः" सुश्रुते तु काण्डेक्षुरित्यत्र काष्ठेक्षुरिति पाठः इतोऽवशिष्टानां गुणास्तत्रोक्ता यथा "कान्तारतापसाविक्षू वंशकानुकरौ गुणे। एवंगुणस्तु काष्ठेक्षुः स तु वातप्रकोपणः। सूचीपत्रो नीलपोरो नैपालो दीर्घपत्रकः। वातलाः कफपित्तघ्नाः सकषाया विदाहिनः" भाव०प्र० "बालयुवद्वृद्धेक्षुगुणाः बालइक्षुः कफं कुर्य्यान्मेदोमेहकरश्च सः। युवा तु वातहृत्स्वादुरीषत्तीक्ष्णश्च वातनुत्। रक्तपित्तहरो वृद्धः क्षतहृद्बलवीर्य्यकृत्। अथाङ्गभेदेन गुणभेदः मूले तु मधुरोऽत्यर्थं मध्येऽपि मधुरः स्मृतः। अग्रेष्वक्षिषु विज्ञेय इक्षूणां लवणो रसः। अथ दन्तपीडितेक्षुरसस्य गुणाः दन्तनिष्पीडितस्येक्षोरसः पित्तास्रनाशनः। शर्करासमवीर्य्यः स्यादविदाही कफप्रदः। अथ यन्त्रपीडितेक्षुरस गुणाः मूलाग्रजन्तुग्रन्थ्यादिपीडनान्मलसङ्करात्। तस्माद्विदाही विष्टम्भी गुरुः स्याद्यान्त्रिको रसः। अथ पर्य्युषितेक्षुरसगुणाः रसः पर्य्युषितो नेष्टो ह्यम्लो वातापहो गुरुः। कफपित्तकरः शोषी भेदनश्चातिमूत्रलः। अथ पक्वस्येक्षुरसस्य गुणाः इक्षोर्विकारास्तृड्दाहमूर्च्छापित्तास्रनाशनाः। गुरवो मधुरा बल्याः स्निग्धा वातहराः स्मृताः। वृष्या मोहहराः ख्याता वृंहणा विषहारिणः। अथ (झोला) फाणितस्य लक्षणं गुणाश्च इक्षोरसस्तु यः पक्वः किञ्चिद्गाढो बहुद्रवः। स एवेक्षुविकारेषु ख्यातः फाणितसंज्ञया। फाणितं गुर्व्वभिष्यन्दि वृंहणं कफशुक्रकृत्। वातपित्तश्रमान् हन्ति मूत्रवस्तिविशोधनम्। अथ मत्स्यण्ड्याः (सारगुड) (राव) इति ख्यातायाः लक्षणं गुणाश्च इक्षोरसो यः संपक्वो घनः किञ्चिद्द्रवान्वितः। मन्दं स्रवति यस्मात् मत्स्यण्डीति ततः स्मृता। मत्स्यण्डी भेदिनी बल्या लघ्वी पित्तानिलापहा। मधुरा वृंहणी वृष्या रक्तदोषापहा स्मृता। अथ (ढिमे गुड़) गुड़स्य लक्षणं गुणाश्च इक्षोरसो यः सम्पक्वो जायते लोष्ट्रवद्दृढः। स गुड़ो गौड़देशे तु मत्स्यण्ड्येव गुड़ो मतः। गुड़ो वृष्यो गुरुः स्निग्धो वातघ्नो मूत्रशोधनः। नातिपित्तहरो मेदःकफकृमिबलप्रदः। अथ नवपुराणगुडगुणाः गुड़ो नवः कफश्वासकासकृमिहरोऽग्निकृत्। पित्तघ्नो मधुरः स्निग्धो वातघ्नोऽसृक्प्रसादनः स पुराणोऽधिकगुणो बुधैः पथ्यतमः स्मृतः" द्रव्यभेदेन युक्तस्य गुड़स्य गुणाः श्लेष्माणमाशु विनिहन्ति सदार्द्रकेण पित्तं निहन्ति च तदेव हरीतकीभिः। शुण्ठ्या समं हरति वातमशेषमित्थं दोषत्रयक्षयकराय नमो गुड़ाय" (खांड) खण्डस्य गुणाः